मटची, स्त्री, (मटनं मटः । मट् अवसादे + भावे अप् मटः चीयते प्रचीयते एभिरिति । मट + चि + बाहुलकात् डिः । मटचिः । ततः कृदिकारादिति पक्षे ङीष् ।) सर्व्वेषामवसादकत्वा दस्यास्तथात्वम् ।) रक्तवर्णक्षुद्रपक्षिविशेषः । पाषाणकृत्ययः । यथा, गोविन्दभाष्यधृतच्छान्दोग्ये । १ । १० । १ ॥ ("मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ इति ॥)

मटस्फटिः, पुं, (मटं अवसादं स्फटति निरा करोति । स्फट् + इः ।) दर्पारम्भः । इति जटाधरः ॥

मट्टकं, क्ली, (मठति वसत्यत्रेति । मठ + अप् । पृषोदरादित्वात् टागमे साधुः । मट्टः । मट्टस्य कं शिरः ।) गृहस्य शिरोभागः । इति केचित् । मट्का इति भाषा ॥

मठ, वासमर्द्दयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-वासे अक०-मर्द्दने सक०-सेट् ।) मठति । वासो निवासः । मर्द्दः केश्चिन्न मन्यते । इति दुर्गादासः ॥

मठ, इ ङ आध्याने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ मण्ठ्यते । आध्यानं स्मृत्य मं औत्सुक्ये इत्यत्र व्याख्यातम् । इति दुर्गादासः ॥

मठः, पुं, छात्रादिनिलयः । इत्यमरः । २ । २ । ८ ॥ मठन्ति वसन्ति छात्रादयोऽत्र मठः । मठ वासमर्द्दयोः अल् । छन्नशीला विद्यार्थिनश्छात्राः । छत्रेण गुरुसेवा लक्ष्यते गुरुदोषच्छादनात् छत्रं तच्छीलत्वात् छात्रः विकारसंघेति णः । आदिना परिव्राजकक्षपणकादीनां ग्रहः । छात्रादीनां निलयो गृहं छात्रादिनिलयः । अर्थकथनमेतत् । नामाप्येतदिति केचित् । छात्रशाला प्रतिश्रयश्चात्रैव । इति भरतः ॥ गन्त्रीरथः । इति हारावली ॥ * ॥ अथ मठादिप्रतिष्ठाप्रयोगः ।

यदि तद्दिने प्रतिमादिप्रतिष्ठा क्रियते तदा तन्त्रेण वृद्धिश्राद्धादिकं विधाय देवप्रतिष्ठातत्त्वोक्तविधिना देवप्रतिष्ठां विधाय गृहप्रतिष्ठा कर्त्तव्या । यदि गृहप्रतिष्ठामात्रं तदा प्रातः कृतनित्यक्रियः प्रक्षालितपाणिपाद आचान्तः प्राङ्मुख उदङ्मुखो वा कुशयुक्तासने उपविश्य ब्राह्मणचयं मत्स्यादिना परितोष्य अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ पुण्याहं भवन्तोऽधिब्रुवन्तु इति त्रिः श्रावयेत् । ॐ पुण्याहमिति त्रिस्तैरुक्ते अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ स्वस्ति भवन्तोऽधिब्रुवन्तु इति त्रिः श्रावयेत् । ॐ स्वस्तीति त्रिस्तैरुक्ते अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ ऋद्धिं भवन्तोऽधिब्रुवन्तु इति त्रिः श्रावयेत् । ॐ ऋद्ध्यतामिति त्रिर्वदेयुः । यजुर्वेदिनां ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु । इत्यनेनाक्षतान् क्षिपेत् । सामगानान्तु । ॐ अस्ति सोमोऽयं सुतः । पिबन्त्यस्य मरुतः । उतस्वराजो अश्विना । अस्ति सोमोऽयं सुतः । पिबन्त्यस्य मरुतो हाइ । उतस्वराजो वा हाइ नो हाइ । इति गीयमानेनाक्षतान् क्षिपेत् । गानाशक्तौ त्रिधा ऋचं वाचयेत् । ततः ।

"सूर्य्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा ।
पवनो दिक्पतिर्भूमिराकाशं खचरामराः ।
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ॥"

इति पठित्वा । तत ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । इति विष्णुं स्तुत्वा नारायणं नमस्कृत्य ॐ तत् सदित्युच्चार्य्य कुशत्रयजलफलपुष्पाण्यादाय ॐ अद्यामुके मासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहितत्वकामः श्रीविष्णुप्रीतिकामो विष्णुलोकप्राप्तिकामो वा विष्णुवेश्मप्रतिष्ठामहं करिष्ये । इति संकल्पयेत् इष्टकादिमये तु एतदिष्टकादिमयवेश्मपरमाणुसमसंख्यकवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोकमहितत्वकाम इति विशेषः । पाषाणवेश्मनि तु तद्दशगुणकालावच्छिन्नस्वर्गलोकेति विशेषः । देवतान्तरगृहप्रतिष्ठायान्तु तदूहेन प्रयोगः ॥ * ॥ ततः संकल्पसूक्तं पठेत् । सामवेदोक्तं तद्यथा ॐ देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् । उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते ॥ यजुर्वेदोक्तं यथा,—

"ॐ यज्जाग्रतो दूरमुदैतु दैवं
तदुसुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु ॥"

ततः सगणाधिपगौर्य्यादिषोड़शमातृकापूजावसोर्धारासम्पातनायुष्यमन्त्रजपाभ्युदयिकश्राद्धानि कर्त्तव्यानि ॥*॥ आयुष्यमन्त्रो यथा । ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरसि । महि प्रजास्त्वष्टाराधिनिधे ह्यस्मे शतं जीवेम शरदो वयन्ते ॥ ॐ आयुषो मे पवस्व वर्चसो मे पवस्व विद्वः पृथिव्या दिवो जनित्राः शृखन्त्यापोऽधः क्षरन्ती सोमोहोदृगाय ममायुषे मम ब्रह्मवर्च्चसाय यजमानस्यर्द्धा अमुकस्य राध्याय ॥ * ॥ तत्र विष्णुवेश्मप्रतिष्ठाभ्युदयार्थमिति वाक्ये विशेषः । एवमन्यवेश्मनि । ततः उत्तराभिमुखं ब्राह्मणमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमानः प्राञ्जलिर्वदेत् । ॐ साधु भवानास्ताम् । ॐ साध्वहमासे इति प्रतिवचनं दत्त्वा तदासने उदङ्मुख उपविशति । ततो यजमानः ॐ अर्च्चयिष्यामो भवन्तं इति वदेत् । ॐअर्च्चयेति प्रतिवचनम् । ततो गन्धपुष्पताम्बूलालङ्कारैरभ्यर्च्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि अमुकगोत्रममुकप्रवरममुकदेवशर्म्माणं भवन्तं अस्मिन् सङ्कल्पितविष्णुवेश्मप्रतिष्ठाकर्म्माङ्गभूतहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धपुष्पताम्बूलालङ्कारवस्त्रैरहं वृणे । ॐ वृतोऽस्मीति प्रतिवचनम् । यथाविहितं ब्रह्मकर्म्म कुरु । ॐ यथाज्ञानं करवाणीति प्रतिवचनम् । स्वयं होमासामर्थ्ये होतुर्वरणमपि तथैव कार्य्यम् । तन्त्रधारकत्वेन आचार्य्यस्यापि तथैव कार्य्यम् । शक्तेन सदस्यस्यापि । गुरोर्वरणे तु संकल्पितेऽस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणीति वक्तव्यम् ॥ * ॥ ततो यजमानः गुरोः पादौ धृत्वा पठेत् ।

"नारायणस्वरूपस्त्वं संसारात्त्राहि मां प्रभो ! ।
त्वत्प्रसादात् गुरो ! यत्नं प्राप्नोमि यन्मयोदितम् ॥
त्राहि नाथ ! प्रपन्नं मां भीतं संसारसागरात् ।
देवतास्थापने ह्यद्य मम शान्तिं कुरु प्रभो ! ॥

ततो गुरुः ।

ॐ उत्तिष्ठ वत्स भद्रन्ते मत्प्रसादात्त्वयानघ ! ।
प्राप्स्यसे धर्म्मकामार्थं दुष्प्रापं यत् सुरासुरैः ॥*॥

ततो गुरुः ।

ॐ पावमानीः स्वस्त्ययनीः स्वदुघा हि घृतश्चुतः ।
ऋषिभिः समृभृतो रसो ब्राह्मणे स्वमृतं हितम् ॥

इति पावमानीसूक्तम् ॥

"असपत्नं पुरस्तान्नः शिवं दक्षिणतः कृधि ।
अभयं सततं पश्चात् भद्रमुत्तरतो गृहे ॥"

इति शाकुनसूक्तम् ॥

ॐ रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो बलगहनोऽवनयामि वैष्णवान् रक्षोहणो बलगहनोऽवस्तृणामि वैष्णवान् । रक्षोहणौ बलगहनावुपदधामि वैष्णवी । रक्षोहणौ बलगहनौ पर्य्यूहामि वैष्णवमसि वैष्णवाः स्थः । इति रक्षासूक्तम् । इति पठित्वा ।

"वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः ।
अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ॥
विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पिशिताशनाश्च ।
सिद्धार्थकैर्वज्रसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु ॥"

इति श्वेतसर्षपान् विकीर्य्य स्वैः स्वैर्मन्त्रैः पञ्चगव्यं शोधयेत् ॥ * ॥ तच्छोधनमन्त्रा यथा ।

ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ।

इति गोमूत्रम् ।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियम् ॥

इति गोमयम् ।

ॐ आप्यायस्व स मे तु ते विश्वतः सोमवृष्ण्यं
भवावाजस्य सङ्गथे ।

इति दुग्धम् ।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य
वाजिनः ।
सुरभिणो मुखाकरत् प्रणतायूंषि तारिषत् ॥

इति दधि ।